# shrIkaNTheshastotram

# શ્રીકણ્ઠેશસ્તોત્રમ્

## Document Information

Text title : shrIkaNTheshastotram

File name : kaNTheshastotram.itx

Category : shiva, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_shiva

Author : sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : November 7, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીકણ્ઠેશસ્તોત્રમ્

(શ્રીગરલપુર આર્દ્રોત્સવે)
શ્રીગણેશાય નમઃ ॥

આર્દ્રાન્તઃકરણસ્ત્વં યસ્માદીશાન ભક્તવૃન્દેષુ ।
આર્દ્રોત્સવપ્રિયોઽતઃ શ્રીકણ્ઠાત્રાસ્તિ નૈવ સન્દેહઃ ॥ ૧॥

દ્રષ્ટૃસ્તવોત્સવસ્ય હિ લોકાન્પાપાત્તથા મૃત્યોઃ ।
મા ભીરસ્ત્વિતિ શમ્ભો મધ્યેતિર્યગ્ગતાગતૈર્બ્રૂષે ॥ ૨॥

પ્રકરોતિ કરુણયાઽઽર્દ્રાન્ શમ્ભુર્નમ્રાનિતિ પ્રબોધાય ।
ધર્મોઽયં કિલ લોકાનાર્દ્રાકુરુતેઽદ્ય ગૌરીશ ॥ ૩॥

આર્દ્રા નટેશસ્ય મનોઽબ્જવૃત્તિરિત્યર્થસમ્બોધકૃતે જનાનામ્ ।
આર્દ્રર્ક્ષ એવોત્સવમાહ શસ્તં પુરાણજાલં તવ પાર્વતીશ ॥ ૪॥

બાણાર્ચને ભગવતઃ પરમેશ્વરસ્ય
    પ્રીતિર્ભવેન્નિરુપમેતિ યતઃ પુરાણૈઃ ।
સમ્બોધ્યતે પરશિવસ્ય યથાન્ધકં તતઃ
    કરોતિ બાણાર્ચનં જગતિ ભક્તિયુતા જનાલિઃ ॥ ૫॥

યથાન્ધકં ત્વં વિનિહત્ય શીઘ્રં લોકસ્ય રક્ષામકરોઃ કૃપાબ્ધે ।
તથાજ્ઞતાં મે વિનિવાર્ય શીઘ્રં વિદ્યાં પ્રયચ્છાશુ સભાધિનાથ ॥ ૬॥

ઇતિ શ‍ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતં શ્રીકણ્ઠેશસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*shrIkaNTheshastotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*